संस्कृत-वार्ता:

12.10.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- तालिबानेन प्रत्याक्रमणक्रमे न्यूनातिन्यूनं अष्टपञ्चाशत् पाकिस्तानी-सैनिकाः व्यापादिताः। मुजाहिद इत्यमुना पाकिस्ताने अन्तर्निहितानां आतङ्कवादिनां निष्कासनाय सञ्चेतना प्रदत्ता।

- प्रधानमन्त्री नरेन्द्रमोदी सेशेल्स् देशे सञ्जाते राष्ट्रपतिनिर्वाचने डॉ. पैट्रिक् हर्मिनी इत्यस्य कृते विजयाय शुभकामनां प्रदत्तवान्। सः प्रोक्तवान् यत् उभयो: देशयोः मध्ये बहुपक्षीयाः सम्बन्धाः सुदृढाः भविष्यन्ति, गतिं च प्राप्स्यन्ति।

- कनाडादेशस्य विदेशमन्त्री अनीता आनन्दः अद्य सायंकाले भारतस्य त्रिदिवसीययात्रार्थं नव दिल्ल्यां संप्राप्स्यति।

- पश्चिम-बङ्गाले दुर्गापुरस्य न्यायालयेन वैद्यकीय-महाविद्यालयस्य एम.बी.बी.एस. द्वितीयवर्षीय-छात्रया सह सामूहिक-बलात्कार-प्रकरणे त्रयः आरोपिणः अद्य दश-दिनानां आरक्षक-निग्रहे प्रेषिताः।

- आई.सी.सी. महिला-एकदिवसीय-क्रिकेटक्रीडा-प्रतिस्पर्धायां भारत-आस्ट्रेलिया देशयोः मध्ये स्पर्धा विशाखापत्तनम-नगरे प्रचलति।

<u>पाक-अफगानसंघर्षः</u>

तालिबानस्य प्रवक्त्रा ज़बीउल्लाह मुजाहिद इत्यमुना अद्य प्रोक्तं यत् बहरामपुर-जनपदे डूरंडरेखायाः समीपस्थे प्रत्याक्रमण-क्रमे तालिबानेन न्यूनातिन्यूनं अष्टपञ्चाशत् पाकिस्तानी-सैनिकाः व्यापादिताः, त्रिंशदधिकाश्च व्रणिताः समभवन्। काबुलनगरे एकस्मिन् वार्ताहर-सम्मेलने ज़बीउल्लाह मुजाहिद इत्यमुना पाकिस्तानोऽपरि आई.एस.आई.एस.-आतंकवादिभ्यः आश्रयप्रदानस्य आरोपः आक्षिप्तः। तेन इस्लामाबादः पाकिस्ताने अन्तर्निहितानां आतङ्कवादिनां निष्कासनाय सञ्चेतितः। तेनोदीरितं यत् अफगानिस्तानस्य पार्श्वे स्वसीम्नाम् रक्षायाः अधिकारः वर्तते। सः प्रावोचत् यत् यः कोऽपि तेषां भूमौ आक्रान्ततां प्रदर्शयिष्यति, अथ च तेषां वायुसीमां अतिक्रमिष्यति, सः तेषां पक्षतः कठोरप्रतिक्रियां सम्मुखीकरिष्यति। मुजाहिद इत्यनेन प्रोक्तं यत् अफगानिस्तान-बलेन पाकिस्तानसेनायाः पञ्चविंशति-स्थानकानि अधिकृतानि। अफगान-तालिबानेन अतिसीम्नी घातक-प्रहाराणां दायित्वम् अङ्गीकृतम्, यस्मिन् अष्टपञ्चाशत् पाकिस्तानी-सैनिकाः मृत्युमुपगताः। तेन एतत्

कार्याचरणम् पत्तिका-प्रान्ते एकस्मिन् नागरिक-आपणे कथित-पाकिस्तानी-वायुप्रहारस्य प्रतिशोधः इति उद्घोषितम्।

<u>प्रधानमन्त्री-सेशेल्स्</u>

प्रधानमन्त्री नरेन्द्रमोदी सेशेल्स् देशे सञ्जाते राष्ट्रपतिनिर्वाचने डॉ. पैट्रिक् हर्मिनी इत्यस्य कृते विजयाय शुभकामनां प्रदत्तवान्। एकस्मिन् सामाजिकान्तर्जालीय सन्देश माध्यमेन प्रधानमन्त्री प्रोक्तवान् यत् हिन्दमहासागरस्य जलं उभाभ्याम् देशाभ्याम् धरोहरं अस्ति। अथ च द्वयोः देशयोः जनानां आकांक्षां आवश्यकतां च पोषयति। सः विश्वासं प्रकटितवान् यत् भारत सेशेल्स् देशयोः मध्ये बहुपक्षीयाः सम्बन्धाः राष्ट्रपते: हर्मिनी इत्यस्य कार्यकालावधौ सुदृढाः भविष्यन्ति सममेव गतिं च प्राप्स्यन्ति।। अस्मिन् निर्वाचने हर्मिनी वर्येण सप्त दशमलवाधिक द्विपञ्चाशत् प्रतिशतमितानि मतानि प्राप्तानि। अपरतः रामकलावनवर्येण त्रि दशमलवाधिक सप्तचत्वारिंशत् प्रतिशतमितानि मतानि प्राप्तानि। श्री हर्मिनी संयुक्त सेशेल्स् पार्टीति दलस्य प्रतिनिधित्वं करोति। सः विंशत्यधिकद्विसहस्र तमवर्षात् पूर्वं चतुर्दशकं यावत् देशस्य नेतृत्वं कृतवान् ।

<u>प्रधानमन्त्री-कृषियोजनाः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवाचार-निवेश-विपण्योपलब्धीनां माध्यमेन कृषकान् सशक्तयितुम् तथा च तान् आत्मनिर्भर-विकसित-भारतस्य प्रमुख-वाहकत्वेन निर्मातुम् सर्वकारस्य प्रतिबद्धता पुनः प्रतिपादिता। श्रीमोदी गत दिने नवदिल्ल्यां कृषि-सम्बद्ध-क्षेत्रेषु द्विचत्वारिंशत्-सहस्र-कोटि-रुप्यतोऽप्यधिकानां विविधानां परियोजनानां उद्घाटनं शिलान्यासञ्च विधाय एतदुक्तवान्। अत्रावसरे प्रधानमन्त्रिणा कृषि-क्षेत्रस्य द्वयोः प्रमुखयोजनयोः प्रधानमन्त्री-धनधान्य-कृषि-योजनाया: तथा द्विदलमाधृत्य आत्मनिर्भरताभियानस्य च शुभारम्भः कृतः। प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् एते उभेऽपि योजने आत्मनिर्भरतायाः ग्रामीण-सशक्तीकरणस्य कृषि-नवाचारस्य च नूतन-युगारम्भाय निर्मिते वर्तेते ।

<u>मोदी-अमेरिकीराजदूतः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना गतदिने नवदिल्लीस्थे स्वकीये आवासे भारते अमेरिकादेशस्य राजदूतरूपेण नियुक्तस्य सर्जियो-गोर इत्यस्य स्वागतम् कृतम्। सामाजिक-सञ्जालीयसन्देशे श्रीमोदिना विश्वासः प्रकटितः यत् तस्य कार्यकालः भारत-अमेरिकादेशयोः व्यापक-वैश्विक-रणनीतिक-सहभागितां इतोऽपि सुदृढीकरिष्यति। विदेशमन्त्रिणा डॉ. एस. जयशङ्करेणापि श्रीसर्जियो-गोर इत्यमुना सह भारत-अमेरिका-सम्बन्धानाम् तथा च अस्य वैश्विक-महत्त्वस्य

विषये चर्चा कृता। श्रीगोरेण राष्ट्रीय-सुरक्षा-परामर्शकेण अजीत-डोभालेन सहापि वार्तालापः कृतः। श्री-गोरेण प्रोक्तं यत् अमेरिका-भारतदेशौ स्वतन्त्र-हिन्द-प्रशान्त-क्षेत्रस्य समेधनार्थं प्रतिबद्धौ स्तः।

## बंगाल-निगडनम्

पश्चिम-बङ्गाले दुर्गापुरस्य न्यायालयेन वैद्यकीय-महाविद्यालयस्य एम.बी.बी.एस. द्वितीयवर्षीय-छात्रया सह सामूहिक-बलात्कार-प्रकरणे त्रयः आरोपिणः अद्य दश-दिनानां आरक्षक-निग्रहे प्रेषिताः। शेख-रेयाजुद्दीनः, अपू-बौरी तथा च फिरदौस-शेखः इमे त्रयः बिजरा-ग्रामतः निगृहीताः ।

## कनाडा-अनीता आनंद

कनाडादेशस्य विदेशमन्त्री अनीता आनन्दः अद्य सायंकाले भारतस्य त्रिदिवसीययात्रार्थं नव दिल्ल्यां संप्राप्स्यति। सा श्वः भारतस्य विदेशमन्त्रिणा डॉ. एस.जयशङ्करेण सह परिचर्चां करिष्यति। सममेव वाणिज्योद्योग-मन्त्रिणा पीयूष गोयलेन सहापि परिचर्चां करिष्यति। अस्मिन् अवसरे द्वयोः देशयोः मध्ये व्यापार - ऊर्जा- सुरक्षा चेत्येतेषु विषयेषु परिचर्चा भविष्यति। सा मुम्बई-नगरं अपि गमिष्यति यत्र सा कनाडा भारतयोः वृत्यवसरान् , आर्थिक-अवसरान् च संवर्धयितुं कार्यं कुर्वद्भिः समवायैः जनै: सह परिचर्चां करिष्यति।

## बिहार-आसनविभाजनम्

एन.डी.ए. इति राष्ट्रीय जनतांत्रिक संयुति इत्यस्य सहयोगिदलानि अद्य बिहार-विधानसभा-निर्वाचनार्थं आसन-विभाजनाय अन्तिमं रूपं दातुं शक्नुवन्ति। भाजपायाः, जनतादलस्य, लोक-जनशक्ति-दलस्य, हिन्दुस्तानी-आवाम-मोर्चा इत्यस्य तथैव राष्ट्रीय-लोक-मोर्चा-पक्षस्य च वरिष्ठ-नेतारः आसन-विभाजनस्य विषयं समाधातुं नवदिल्ली-नगरे उपस्थिताः सन्ति। अस्य उपवेशनस्य अनन्तरं आसन-विभाजनस्य घोषणा भवितुमर्हति। अतः पूर्वं, बिहार-भाजपा-अध्यक्षेण डॉ. दिलीप-जायसवालेन उद्घोषितं यत् आसन-विभाजनोऽपरि औपचारिक-सन्धिः शनिवासरं यावत् भविष्यति। भाजपायाः राष्ट्रिय-अध्यक्षेण जे.पी.नड्डा इत्यमुनापि आसन - विभागविषये दलस्य मूल-समिति-सदस्यैः सह निरन्तरं विचार-विमर्शः कृतः। विपक्षी-महागठबन्धनमपि आसन-विभागविषये एतादृशस्यैव गतिरोधस्य सम्मुखीकरणं कुर्वदस्ति। कांग्रेस-दलमपि मुकेश-साहनी इत्यस्य विकासशील-इंसान-दलस्य अधिकासन-याचना-

प्रस्तावस्य विरोधं कुर्वदस्ति तथा च उपमुख्यमन्त्री-पदस्य याचनायामपि आपत्तिं प्रकटीकरोति। अत्रान्तरे वाम-दलैः आसन-विभाजने विलम्बार्थं असन्तोषः प्रकटीकृतः ।

## क्रिकेट-आईसीसी

आई.सी.सी. महिला-एकदिवसीय-क्रिकेटक्रीडा-प्रतिस्पर्धायां भारत-आस्ट्रेलिया दलयोः मध्ये स्पर्धा विशाखापत्तनम-नगरे प्रचलति। आस्ट्रेलिया- दलेन पणकं विजित्य स्पर्धायां क्षेत्र-रक्षणस्य निर्णयः विहितः।

।। इति वार्ताः ।।